CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 51

Title BATUKA BHAIRAVA KAVACA.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 51 Subject: Tantric Ritual.

Title: Batuka Bhairava Kavaca

Author: — Scribe: Iśvaraji

Date of the work: — Date of the Ms.: V.S 1794

Place of the work: — Place of the Ms.: —

Size: 8.5" x 4.6" Extent: 2 folios.

Language: Sanskrit — Script: Devanagari.

Remarks: Complete.

॥श्रीमहादेव उवाच॥ देवेशि देहरक्षार्थं कारणं कथ्यतां ध्रुवं॥ म्रियंते साधका येन विना श्मश
ानभूमिषु॥१॥ रणेषु चातिघोरेषु महावायुजलेषु च॥ शृंगिसलिलवज्रेषु ज्वराद्याधिवह्नि
षु॥२॥ श्रीदेव्युवाच॥ कथयामि शृणु प्राज्ञ बटुकस्य कवचं शुभं॥ गोपनीयं प्रयत्नेन मातृजा
रपरेयथा॥३॥ ॐ अस्य श्रीबटुकभैरवकवचस्य॥ आनंदभैरवो ऋषिः त्रिष्टुप् छंदः बटु
कभैरवो देवता। वं बीजं ह्रीं शक्तिः ॐ कीलकं। मम निष्टसिध्यर्थे जपे विनियोगः॥ सहस्रा
रे ब्रह्मपद्मे करूर्ध्ववक्त्रो गुरुः॥ पातु मां बटुको देवो भैरवः पातु मर्मसु॥४॥ पूर्वस्यामसितां
गो मे दिशि रक्षतु सर्वदा॥ आग्नेयां च रुरुः पातु दक्षिणे चंडभैरवः॥५॥ नैरृत्यां क्रोधनः
पातु मामुन्मत्त पश्चिमे॥ वायव्यां मां कपाली च नित्यं पायात् सुरेश्वरः॥६॥ भीषणो भैरवः २
पातु उत्तरस्यां दिशि सर्वदा॥ संहारभैरवः पातु दिशि शान्यां महेश्वरः॥७॥ ऊर्ध्वं पातु विधा
ता वै पाताले नंतको विभुः॥ सद्योजातस्तु मां पायात् सर्वतो देवसेवितः॥८॥ वामदेवो व

॥श्रीमहादेव उवाच॥ देवेशी देहरक्षार्थं कारणं कथ्यतां ध्रुवं॥ म्रियंते साधका येन विना स्मर
णं भूमिषु॥१॥ रणेषु चा निघोरेषु महावायुनयेषु च॥ श्रृंगी सलिलवज्रेषु ज्वराधिव्याधि वह्नि
षु॥२॥ श्रीदेव्युवाच॥ कथयामि शृणु भद्रं बटुकस्य कवचं शुभं॥ गोपनीयं प्रयत्नेन मातृजा
रपरेयया॥३॥ ॐ अस्य श्रीबटुकभैरवा कवचस्य॥ नंदभैरवो ऋषिः त्रिष्टुप् छंदः बटु
कभैरवो देवता॥ वं बीजं॥ ह्रीं शक्तिः॥ ॐ कीलकं॥ ममाभिष्टसिध्यर्थे जपे विनियोगः॥ सहस्रा
रे ब्रह्मपद्मांकस्थ धवलो गुरुः॥ पातु मां बटुको देवो भैरवः पातु नर्मसु॥४॥ पूर्वस्यामसितां
गो मे दिशि रक्षतु सर्वदा॥ आग्नेयां तु रुरुः पातु दक्षिणे चंडभैरवः॥५॥ नैरृत्यां क्रोधनः
पातु मामुन्मत्त पश्चिमे॥ वायव्यां मां कपाली च नित्यं पायात्सुरेश्वरः॥६॥ भीषणो भैरवः २
पातु उत्तरस्यां दिशि सर्वदा॥ संहारभैरवः पातु दिशिशांन्यां महेश्वरः॥७॥ ऊर्ध्वं पातु विधा
ता वै पाताले नंतको विभुः॥ सद्योजातस्तु मां पायात् सर्वतो देवसेवितः॥८॥ वामदेवोव

तु मां तेंवने घोरे तथावतु॥ जले तत्पुरुषः पातु स्थले पातु रुरुः सदा॥९॥ डाकिनीपुत्रकः पातु पुत्रात्मे
सर्वतः प्रभुः॥ हाकिनीपुत्रकः पातु दारांस्तु लाकिनीसुतः॥१०॥ पातु शाकिनीका पुत्र श्रियं मे सत
तं गिरिः॥ मालिनीपुत्रकः पातु पशुनश्वान्नजांस्तथा॥११॥ महाकालोवतु छत्रं सैन्यं वै कालभैरवः
॥ वाद्यं वाद्यप्रियः पातु भैरवो नीतिहा नवः॥१२॥ एतत्कवचमीशान तव स्नेहात् प्रकाशितं॥ नाख्ये
यं परलोकेषु सारभूतं सुरप्रियं॥१३॥ यस्मै कस्मै न दातव्यं कवचं सुरदुर्लभं॥ न देयं परशिष्ये
भ्यो कृपणेभ्यश्च शंकर॥१४॥ यो ददाति निषिध्येभ्यः स वै भ्रष्टो भवेद्ध्रुवं॥ अनेन कवचेनेन रक्षां
कृत्वा विचक्षणः॥१५॥ विचरन् यत्रकुत्रापि न विघ्नैः बाध्यते हि सः॥ मंत्रेण म्रियते योगी कव
चं रक्षकं यतः॥१६॥ तस्मात्सर्वप्रयत्नेन दुर्लभं पापचेतसः॥ भूर्जे रंभात्वचे वापि लिखित्वा
विधिवत् प्रभो॥१७॥ धारयेत्पाठयेद्वापि पठेद्वापि नित्यशः॥ स प्राप्नोति फलं सर्वं नात्र कार्या
विचारणात्॥१८॥ सततं पठते येन तत्र भैरवसंस्थितः॥ नशक्नोमि प्रभावं वै कवचस्यास्य व

र्णितुं॥१९॥ नमो भैरवदेवाय सारभूताय वै नमः॥ नमः त्रैलोक्यनाथाय नाथनाथाय
वै नमः॥२०॥ ॥इति श्रीभैरवतंत्रे देविरहस्ये उमाशिवसंवादे बटुकभैरवकवचं सं
पूर्णं॥ ॥ ॥समाप्तं॥ संवत् १८५५ ना वर्षे कार्त्तिक वदी १२ भृगुवारे लिखितं
॥ भवानीशंकर जोशी सुत ईश्वर जी के न्ये लिखितं॥ शिवार्पणं॥ श्री ॥ छ ॥ ॥